# Shriramadurga Stotram 2

# શ્રીરામદુર્ગસ્તોત્રમ્ ૨

## Document Information

Text title : shrIrAmadurgastotram 2

File name : shrIrAmadurgastotram2.itx

Category : raama, kavacha, durga

Location : doc_raama

Author : Traditional

Proofread by : NA

Latest update : December 29, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 29, 2023

*sanskritdocuments.org*

# શ્રીરામદુર્ગસ્તોત્રમ્ ૨

ॐ અસ્ય શ્રીરામદુર્ગસ્તોત્રમન્ત્રસ્ય વિશ્વામિત્ર ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીરામોદેવતા, રાં બીજં, નમઃ શક્તિઃ,
રામાય કીલકં, શ્રી સીતારામ પ્રીત્યર્થે પાઠે વિનિયોગઃ ॥

અથ ઋષ્યાદિ ન્યાસઃ ।
ॐ વિશ્વમિત્રઋષયે નમઃ શિરસિ । અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
શ્રીરામો દેવતાયૈ નમઃ હૃદિ । રાં બીજાય નમઃ ગુહ્યે ।
નમઃ શક્તયે નમઃ પાદયોઃ । રામાયેતિ કીલકાય નમઃ નાભૌ ।
ॐ હું ફટ્ સ્વાહા ઇતિ દિગ્બન્ધઃ ॥

અથ કરન્યાસઃ ।
રાં અઙ્ગુષ્ઠાભ્યાં નમઃ । રાં તર્જનીભ્યાં નમઃ ।
માં મધ્યમાભ્યાં નમઃ । યં અનામિકાભ્યાં નમઃ ।
નં કનિષ્ઠિકાભ્યાં નમઃ । મઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અથ હૃદયાદિ ન્યાસઃ ।
રાં હૃદયાય નમઃ । રાં શિરસે સ્વાહા । માં શિખાયૈ વષટ્ ।
યં કવચાય હું । નં નેત્રાભ્યાં વૌષટ્ । મઃ અસ્ત્રાય ફટ્ ।
શ્રીરામદુર્ગં પઠેદ્ ભક્ત્યા સર્વોપદ્રવ નાશનમ્ ॥

ॐ શ્રીરામો રક્ષેન્માં પ્રાચ્યાં રક્ષેદ્યામ્યાતુ લક્ષ્મણઃ ।
પ્રતીચ્યાં ભરતો રક્ષેદુદીચ્યાં શત્રુમર્દનઃ ॥ ૧॥

ઐશાન્યાં જાનકી રક્ષેદાગ્નેયાં રવિનન્દનઃ ।
બિભીષણસ્તુ નૈરૃત્યાં વાયવ્યાં વાયુનન્દનઃ ॥ ૨॥

ઊર્ધ્વં રક્ષેન્મહાવિષ્ણુર્મધ્યં પાતુ નૃકેશરી ।
અધસ્તુ વામનઃ પાતુ સર્વતઃ પાતુ કેશવઃ ॥ ૩॥

સર્વદા કપિસેનાદ્યાઃ સર્વમર્કટનાયકાઃ ।

ચતુર્દ્વારં સદા રક્ષેચ્ચતુર્ભિઃ કપિપુઙ્ગવૈઃ ॥ ૪॥

શ્રીરામાખ્યં મહાદુર્ગં વિશ્વામિત્રકૃતં શુભમ્ ।
યઃ સ્મરેદ્ ભયકાલે તુ સર્વશત્રુવિનાશનમ્ ॥ ૫॥ (યઃ પઠેદ્)

રામદુર્ગં પઠેદ્ભક્ત્યા સર્વોપદ્રવનાશનમ્ ।
સર્વસમ્પદ્પ્રદં નૃણાં સ ગચ્છેદ્વૈષ્ણવં પદમ્ ॥ ૬॥ (સર્વ સમ્પત્કરં)

ઇતિ શ્રીરામદુર્ગસ્તોત્રં સમ્પૂર્ણમ્ ॥

---

*Shriramadurga Stotram 2*

pdf was typeset on December 29, 2023

Please send corrections to *sanskrit@cheerful.com*